# Ribhuproktam Jivanmuktaprakaranam

# ઋભુપ્રોક્તં જીવન્મુક્તપ્રકરણમ્

## Document Information

Text title : Ribhuproktam Jivanmuktaprakaranam

File name : RRibhuproktaMjIvanmuktaprakaraNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 11 | 1-64||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં જીવન્મુક્તપ્રકરણમ્

(સ જીવન્મુક્ત ઉચ્યતે)

બ્રહ્મજ્ઞાનં પ્રવક્ષ્યામિ જીવન્મુક્તસ્ય લક્ષણમ્ ।
આત્મમાત્રેણ યસ્તિષ્ઠેત્સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧॥

અહં બ્રહ્મવદેવેદં (બ્રહ્મવદદેવ) મહમાત્મા ન સંશયઃ ।
ચૈતન્યાત્મેતિ યસ્તિષ્ઠેત્સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨॥

ચિદાત્માહં પરાત્માહં નિર્ગુણોઽહં પરાત્પરઃ ।
ઇત્યેવં નિશ્ચયો યસ્ય સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩॥

દેહત્રયાતિરિક્તોઽહં બ્રહ્મ ચૈતન્યમસ્મ્યહમ્ ।
બ્રહ્માહમિતિ યસ્યાન્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪॥

આનન્દઘનરૂપોઽસ્મિ પરાનન્દપરોઽસ્મ્યહમ્ ।
યશ્ચિદેવં પરાનન્દં સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫॥

યસ્ય દેહાદિકં નાસ્તિ યસ્ય બ્રહ્મેતિ નિશ્ચયઃ ।
પરમાનન્દપૂર્ણો યઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૬॥

યસ્ય કિઞ્ચિદહં નાસ્તિ ચિન્માત્રેણાવતિષ્ઠતે ।
પરાનન્દો મુદાનન્દઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૭॥

ચૈતન્યમાત્રં યસ્યાન્તશ્ચિન્માત્રૈકસ્વરૂપવાન્ ।
ન સ્મરત્યન્યકલનં (કલલં) સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૮॥

સર્વત્ર પરિપૂર્ણાત્મા સર્વત્ર કલનાત્મકઃ ।
સર્વત્ર નિત્યપૂર્ણાત્મા સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૯॥

પરમાત્મપરા નિત્યં પરમાત્મેતિ નિશ્ચિતઃ ।
આનન્દાકૃતિરવ્યક્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૦॥

શુદ્ધકૈવલ્યજીવાત્મા સર્વસઙ્ગવિવર્જિતઃ ।

નિત્યાનન્દપ્રસન્નાત્મા સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૧॥

એકરૂપઃ પ્રશાન્તાત્મા અન્યચિન્તાવિવર્જિતઃ ।
કિઞ્ચિદસ્તિત્વહીનો યઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૨॥

ન મે ચિત્તં ન મે બુદ્ધિર્નાહઙ્કારો ન ચેન્દ્રિયઃ ।
કેવલં બ્રહ્મમાત્રત્વાત્ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૩॥

ન મે દોષો ન મે દેહો ને મે પ્રાણો ન મે ક્વચિત્ ।
દૃઢનિશ્ચયવાન્યોઽન્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૪॥

ન મે માયા ન મે કામો ન મે ક્રોધોઽપરોઽસ્મ્યહમ્ ।
ન મે કિઞ્ચિદિદં વાઽપિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૫॥

ન મે દોષો ન મે લિઙ્ગં ન મે બન્ધઃ ક્વચિજ્જગત્ ।
યસ્તુ નિત્યં સદાનન્દઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૬॥

ન મે શ્રોત્રં ન મે નાસા ન મે ચક્ષુર્ન મે મનઃ ।
ન મે જિહ્વેતિ યસ્યાન્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૭॥

ન મે દેહો ન મે લિઙ્ગં ન મે કારણમેવ ચ ।
ન મે તુર્યમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૮॥

ઇદં સર્વં ન મે કિઞ્ચિદયં સર્વં ન મે ક્વચિત્ ।
બ્રહ્મમાત્રેણ યસ્તિષ્ઠેત્સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૧૯॥

ન મે કિઞ્ચિન્ન મે કશ્ચિન્ન મે કશ્ચિત્ક્વચિજ્જગત્ ।
અહમેવેતિ યસ્તિષ્ઠેત્સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૦॥

ન મે કાલો ન મે દેશો ન મે વસ્તુ ન મે સ્થિતિઃ ।
ન મે સ્નાનં ન મે પ્રાસઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૧॥

ન મે તીર્થં ન મે સેવા ન મે દેવો ન મે સ્થલમ્ ।
ન ક્વચિદ્ભેદહીનોઽયં સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૨॥

ન મે બન્ધં ન મે જન્મ ન મે જ્ઞાનં ન મે પદમ્ ।
ન મે વાક્યમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૩॥

ન મે પુણ્યં ન મે પાપં ન મે કાયં ન મે શુભમ્ ।
ન મે દૃશ્યમિતિ જ્ઞાની સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૪॥

ન મે શબ્દો ન મે સ્પર્શો ન મે રૂપં ન મે રસઃ ।
ન મે જીવ ઇતિ જ્ઞાત્વા સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૫॥

ન મે સર્વં ન મે કિઞ્ચિન્ન મે જીવં ન મે ક્વચિત્ ।
ન મે ભાવં ન મે વસ્તુ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૬॥

ન મે મોક્ષ્યે ન મે દ્વૈતં ન મે વેદો ન મે વિધિઃ ।
ન મે દૂરમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૭॥

ન મે ગુરુર્ન મે શિષ્યો ન મે બોધો ન મે પરઃ ।
ન મે શ્રેષ્ઠં ક્વચિદ્વસ્તુ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૮॥

ન મે બ્રહ્મા ન મે વિષ્ણુર્ન મે રુદ્રો ન મે રવિઃ ।
ન મે કર્મ ક્વચિદ્વસ્તુ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૨૯॥

ન મે પૃથ્વી ન મે તોયં ન મે તેજો ન મે વિયત્ ।
ન મે કાર્યમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૦॥

ન મે વાર્તા ન મે વાક્યં ન મે ગોત્રં ન મે કુલમ્ ।
ન મે વિદ્યેતિ યઃ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૧॥

ન મે નાદો ન મે શબ્દો ન મે લક્ષ્યં ન મે ભવઃ ।
ન મે ધ્યાનમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૨॥

ન મે શીતં ન મે ચોષ્ણં ન મે મોહો ન મે જપઃ ।
ન મે સન્ધ્યેતિ યઃ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૩॥

ન મે જપો ન મે મન્ત્રો ન મે હોમો ન મે નિશા ।
ન મે સર્વમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૪॥

ન મે ભયં ન મે ચાન્નં ન મે તૃષ્ણા ન મે ક્ષુધા ।
ન મે ચાત્મેતિ યઃ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૫॥

ન મે પૂર્વં ન મે પશ્ચાન્ન મે ચોર્ધ્વં ન મે દિશઃ ।
ન ચિત્તમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૬॥

ન મે વક્તવ્યમલ્પં વા ન મે શ્રોતવ્યમણ્વપિ ।
ન મે મન્તવ્યમીષદ્વા સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૭॥

ન મે ભોક્તવ્યમીષદ્વા ન મે ધ્યાતવ્યમણ્વપિ ।
ન મે સ્મર્તવ્યમેવાયં સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૮॥

ન મે ભોગો ન મે રોગો ન મે યોગો ન મે લયઃ ।
ન મે સર્વમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૩૯॥

ન મેઽસ્તિત્વં ન મે જાતં ન મે વૃદ્ધં ન મે ક્ષયઃ ।
અધ્યારોપો ન મે સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૦॥

અધ્યારોપ્યં ન મે કિઞ્ચિદપવાદો ન મે ક્વચિત્ ।
ન મે કિઞ્ચિદહં યત્તુ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૧॥

ન મે શુદ્ધિર્ન મે શુભ્રો ન મે ચૈકં ન મે બહુ ।
ન મે ભૂતં ન મે કાર્યં સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૨॥

ન મે કોઽહં ન મે ચેદં ન મે નાન્યં ન મે સ્વયમ્ ।
ન મે કશ્ચિન્ન મે સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૩॥

ન મે માંસં ન મે રક્તં ન મે મેદો ન મે શકૃત્ ।
ન મે કૃપા ન મેઽસ્તીતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૪॥

ન મે સર્વં ન મે શુક્લં ન મે નીલં ન મે પૃથક્ ।
ન મે સ્વસ્થઃ સ્વયં યો વા સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૫॥

ન મે તાપં ન મે લોભો ન મે ગૌણ ન મે યશઃ ।
ને મે તત્ત્વમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૬॥

ન મે ભ્રાન્તિર્ન મે જ્ઞાનં ન મે ગુહ્યં ન મે કુલમ્ ।
ન મે કિઞ્ચિદિતિ ધ્યાયન્સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૭॥

ન મે ત્યાજ્યં ન મે ગ્રાહ્યં ન મે હાસ્યં ન મે લયઃ ।
ન મે દૈવમિતિ સ્વસ્થઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૮॥

ન મે વ્રતં ન મે ગ્લાનિઃ ન મે શોચ્યં ન મે સુખમ્ ।
ન મે ન્યૂનં ક્વચિદ્વસ્તુ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૪૯॥

ન મે જ્ઞાતા ન મે જ્ઞાનં ન મે જ્ઞેયં ન મે સ્વયમ્ ।
ન મે સર્વમિતિ જ્ઞાની સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૦॥

ન મે તુભ્યં ન મે મહ્યં ન મે ત્વત્તો ન મે ત્વહમ્ ।
ન મે ગુરુર્ન મે યસ્તુ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૧॥

ન મે જડં ન મે ચૈત્યં ન મે ગ્લાનં ન મે શુભમ્ ।

ન મે ન મેતિ યસ્તિષ્ઠેત્સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૨॥

ન મે ગોત્રં ન મે સૂત્રં ન મે પાત્રં ન મે કૃપા ।
ન મે કિઞ્ચિદિતિ ધ્યાયી સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૩॥

ન મે ચાત્મા ન મે નાત્મા ન મે સ્વર્ગં ન મે ફલમ્ ।
ન મે દૂષ્યં ક્વચિદ્વસ્તુ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૪॥

ન મેઽભ્યાસો ન મે વિદ્યા ન મે શાન્તિર્ન મે દમઃ ।
ન મે પુરમિતિ જ્ઞાની સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૫॥

ન મે શલ્યં ન મે શઙ્કા ન મે સુપ્તિર્ન મે મનઃ ।
ન મે વિકલ્પ ઇત્યાપ્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૬॥

ન મે જરા ન મે બાલ્યં ન મે યૌવનમણ્વપિ ।
ન મે મૃતિર્ન મે ધ્વાન્તં સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૭॥

ન મે લોકં ન મે ભોગં ન મે સર્વમિતિ સ્મૃતઃ ।
ન મે મૌનમિતિ પ્રાપ્તં સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૮॥

અહં બ્રહ્મ હ્યહં બ્રહ્મ હ્યહં બ્રહ્મેતિ નિશ્ચયઃ ।
ચિદહં ચિદહં ચેતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૫૯॥

બ્રહ્મૈવાહં ચિદેવાહં પરૈવાહં ન સંશયઃ ।
સ્વયમેવ સ્વયં જ્યોતિઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૬૦॥

સ્વયમેવ સ્વયં પશ્યેત્સ્વયમેવ સ્વયં સ્થિતઃ ।
સ્વાત્મન્યેવ સ્વયં ભૂતઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૬૧॥

સ્વાત્માનન્દં સ્વયં ભુઙ્ક્ષ્વે સ્વાત્મરાજ્યે સ્વયં વસે ।
સ્વાત્મરાજ્યે સ્વયં પશ્યે સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૬૨॥

સ્વયમેવાહમેકાગ્રઃ સ્વયમેવ સ્વયં પ્રભુઃ ।
સ્વસ્વરૂપઃ સ્વયં પશ્યે સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧.૬૩॥

- -

જીવન્મુક્તિપ્રકરણં સર્વવેદેષુ દુર્લભમ્ ।
યઃ શ ૃણોતિ સકૃદ્વાપિ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૧૧.૬૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં જીવન્મુક્તપ્રકરણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૧૧ । ૧-૬૪ ॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 11 . 1-64..

Notes :
Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

---

*Ribhuproktam Jivanmuktaprakaranam*
pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*